## PART—IV / भागः —IV

### LANGUAGE—I / भाषा—I
### Sanskrit / संस्कृतम्

| |
|---|
| अभ्यर्थिनः **चतुर्थभागस्य** (Part–IV) प्रश्नानाम् (प्र० सं० **91–120**) उत्तराणि दद्युः, यदि तैः **संस्कृतं प्रथमभाषा** (Language—I)-रूपेण चितम्। |

**91.** भवान् स्वकक्षायां छात्राणां सर्वाधिकां भागग्राहितां इच्छति। अनेन प्रयोजनेन भवान् निम्नलिखितेषु कां विधिं प्रयोक्तुम् इच्छति?

(1) सस्वरपठनम् (Recitation)
(2) चर्चा-परिचर्चाम् (Discussion)
(3) प्रदर्शनम् (Demonstration)
(4) आदर्शपठनम्

**92.** कश्चित् श्रोता विशिष्टविवरणं शृणोति, ज्ञानसाधनानि (cognates) अभिजानाति तथा शब्दक्रमव्यवस्थां अभिजानाति। एषा श्रवणप्रक्रिया किं कथ्यते?

(1) रेखीयप्रक्रिया
(2) अधःऊर्ध्वं प्रक्रिया
(3) ऊर्ध्व-अधःप्रक्रिया
(4) निष्कर्षणात्मिकां प्रक्रिया

**93.** पठनक्रियायां, लधुकथाप्रसङ्गे, निम्नलिखितं किमस्ति?

(1) अध्यापकः नवीनशब्दानां अर्थान् पृच्छति तथा तेषु वाक्यानि निर्मातुं प्रेरयति
(2) छात्राः कथायां भावि-घटनानां सम्भावनां चर्चयन्ति
(3) छात्राः युगलकार्यं कुर्वन्ति तथा परस्परं पठन्ति
(4) छात्राः कवेः जीवनवृत्तात्मकविवरणं चर्चयन्ति

**94.** कक्षायां भवान् कमपि प्रश्नं न पृच्छति। विकल्परूपेण भवान् तान् कानिचित् लघुपाठ्यानि ददाति तथा छात्रान् प्रश्नान् निर्मातुं कथयति। भवतां कार्यस्य उद्देश्यं अस्ति—

(1) स्वछात्राणां विश्लेषणात्मकं तर्कात्मकं च चिन्तनं वर्धयितुम् इच्छति
(2) स्वछात्रान् उत्कृष्टान् प्रश्नपत्रनिर्मातॄन् कर्तुम् इच्छति
(3) स्वप्रश्नपत्रनिर्माणकार्ये भवान् तेषां सहायतां ग्रहीतुम् इच्छति
(4) भवान् छात्रान् अनुभूतिं कारयितुम् इच्छति यत् प्रश्नपत्रनिर्माणस्य कार्यं कीदृशं कठिनम् अस्ति

**95.** भाषाशिक्षणस्य मूल्यांकने निम्नलिखितं परिमीयते—

(1) छात्राणां भाषा-क्षमता
(2) छात्राः तेषां सहपाठिनां तुलनायां काम् उपलब्धिं कृतवन्तः
(3) तेषां समग्रा अथवा समेकिता उपलब्धिः
(4) छात्राणां भाषा-उपलब्धिः

**96.** पाठन-सहायकायाः सामग्र्याः उद्देश्यम् अस्ति—

(1) कक्षायां छात्राणां ध्यानाकर्षणं कर्तुम्
(2) छात्रान् शिक्षणकार्ये संलग्नान् कर्तुम्
(3) छात्राणां शिक्षणपरिणामम् आशाजनकं कर्तुम्
(4) कक्षायां अनुशासनहीनतायाः घटनाः न्यूनीकर्तुम्

**97.** भवतां एकः छात्रः लोकप्रियं पुस्तकं गृह्णाति तथा चित्राणि संकेतरूपेण प्रयोज्य कथां पुनः श्रावयति। अनेन दृढतया प्रस्तूयते—

(1) वर्णनात्मकः अवबोधः
(2) उदीयमाना पठन-अवस्था
(3) ध्वन्यात्मकः अवबोधः
(4) अर्थविज्ञानात्मकः अवबोधः

**निर्देशः** —निम्नलिखितं गद्यांशं पठित्वा नवप्रश्नानाम् (**98–106**) उत्तराणि यथोचितं विकल्पं चित्वा देयानि।

अस्ति एकं निर्जनं वनम्। एकदा कश्चित् व्याधः वनम् आगच्छति। सः तण्डुलकणान् भूतले विकिरति। तत्र सः जालं प्रसारयति। स्वयं दूरं गत्वा प्रच्छन्नः तिष्ठति।

चित्रग्रीवः नाम कपोतराजः कपोतैः सह आकाशे उत्पतति। कपोताः भूमौ तण्डुलकणान् पश्यन्ति। ते तण्डुलकणान् अभिलषन्ति।

चित्रग्रीवः वदति—अत्र निर्जने वने कुतः तण्डुलकणाः? किंचित् अनिष्टं पश्यामि अहम्।

एकः कपोतः वदति—किम् अनिष्टम् अत्र? यदि सर्वत्र शङ्कां करिष्यामः तर्हि अस्माकं जीवनम् अपि कठिनं भविष्यति। अतः वयं भूमौ अवतरामः।

सर्वे कपोताः तण्डुलार्थं गगनात् अवतरन्ति। ततः जाले बद्धाः ते दुःखिताः भवन्ति।

चित्रग्रीवः वदति—न भेतव्यम्। वयम् उपायं चिन्तयामः। वयं समकालम् एव जालेन सह उत्पतामः।

कपोताः जालेन सह गगनम् उत्पतन्ति। चकितः व्याधः दूरात् तद् दृश्यं पश्यति। खिन्नः सः गृहं गच्छति।

चित्रग्रीवः पुनः वदति—चित्रवने हिरण्यकः नाम मूषकराजः निवसति। वयं तस्य समीपं गच्छामः। सः अस्माकं पाशानां छेदनं करिष्यति।

सर्वे कपोताः हिरण्यकस्य बिलस्य समीपम् आगच्छन्ति। हिरण्यकः स्वमित्रं दृष्ट्वा प्रसन्नः भवति किन्तु तस्य बन्धनं दृष्ट्वा दुःखी भवति। सः शीघ्रं स्वमित्रस्य बन्धनस्य छेदनाय तत्परः भवति।

चित्रग्रीवः हिरण्यकं निवारयति वदति च—भोः वयस्य, प्रथमं सर्वेषां पाशानां छेदनं कुरु, अनन्तरं मम।

**98.** भूतले तण्डुलकणान् कः विकिरति?

(1) ग्रामीणः
(2) मुनिः
(3) व्याधः
(4) चित्रग्रीवः

**99.** कपोतैः सह आकाशे कः उत्पतति?

(1) वायसाः
(2) व्याधः
(3) सर्वे पक्षिणः
(4) कपोतराजः चित्रग्रीवः

**100.** चित्रग्रीवः किं दृष्ट्वा अनिष्टं अपश्यत्?

(1) वायसानां क्रोशनम्
(2) व्याधम्
(3) उड्डीयमानान् विहगान्
(4) निर्जनवने तण्डुलकणान्

**101.** ''यदि सर्वत्र शङ्कां करिष्यामः तर्हि अस्माकं जीवनम् अपि कठिनं भविष्यति।''

कथनमिदं कस्य विद्यते?

(1) शृगालस्य
(2) कपोतानां मध्ये एकस्य कपोतस्य
(3) कपोतराजस्य
(4) वायसस्य

**102.** गद्यांशे प्रयुक्तस्य 'अभिलषन्ति' इत्यस्मिन् अर्थे निम्नलिखितेषु कः शब्दः प्रयोक्तुं शक्यते?

(1) त्यजन्ति
(2) पश्यन्ति
(3) इच्छन्ति
(4) शृङ्गारं कुर्वन्ति

**103.** 'अनिष्ट'-शब्दस्य निम्नलिखितेषु कः पर्यायवाची?

(1) सङ्कटम्
(2) विषादः
(3) आशङ्का
(4) भयम्

**104.** 'प्रच्छन्नः'-पदस्य निर्वचनं क्रियताम्—

(1) प्र + छिद् + क्त प्रत्यय
(2) प्र + छन् + नः
(3) प्र + छत् + क्तः
(4) प्र + छद् + क्तः

**105.** 'अवतरन्ति' इत्यस्मिन् पदे कः धातुः?

(1) तिर्
(2) तृ
(3) तॄ
(4) तर्

**106.** 'छेदनम्' इत्यस्य पदस्य निर्वचनं दीयताम्—

(1) छद् + ल्युट्
(2) छेद् + ल्युट्
(3) छिद् + अन्
(4) छिद् + ल्युट्

**निर्देशः**—निम्नलिखितानि पद्यानि पठित्वा षट्प्रश्नानां (**107–112**) उत्तराणि समुचितं विकल्पं चित्वा देयानि।

न चौरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम्॥1॥

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततस्सुखम्॥2॥

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥3॥

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥4॥

किं कुलेन विशालेन विद्याहीनस्य देहिनः।
अकुलीनोऽपि विद्यावान्देवैरपि स पूज्यते॥5॥

**107.** ''व्यये कृते वर्धत एव नित्यम्''
अस्य कथनस्य प्रसङ्गे किम् उपयुक्तम्?

(1) समयः
(2) स्वर्णम्
(3) रजतम्
(4) विद्या

**108.** सर्वत्र कः पूज्यते?

(1) अघवान्
(2) विद्वान्
(3) बलवान्
(4) धनवान्

**109.** ''किं कुलेन विशालेन विद्याहीनस्य देहिनः''
अस्य सिद्धान्तस्य किं सारवाक्यम्?

(1) विद्यारहिते विशालकुले दुर्व्यसनानि जायन्ते
(2) विद्याविहीनं विशालकुलं निरर्थकम्
(3) विद्याविहीने विशालकुले कलहाः भवन्ति
(4) विद्याविहीनं विशालकुलं नाशं गच्छति

**110.** 'देहिनः'-पदस्य कोऽर्थः?

(1) स्थूलकायस्य
(2) बलिष्ठदेहयुक्तस्य
(3) परमात्मनः
(4) जीवात्मनः

**111.** ''स्वदेशे पूज्यते राजा'' अत्र किं वाच्यम् अस्ति?

(1) भावकर्मवाच्यम्
(2) कर्तृवाच्यम्
(3) कर्मवाच्यम्
(4) भाववाच्यम्

**112.** 'आयाति' इत्यस्मिन् पदे को धातुः कस्य गणस्य च वर्तते?

(1) अय् धातु भ्वादिगणस्य
(2) इ धातु भ्वादिगणः
(3) या धातु भ्वादिगणः
(4) या धातु अदादिगणस्य

**113.** भाषा-शिक्षणस्य विषये निम्नलिखितेषु किं सत्यम् अस्ति?

(1) भाषा-शिक्षणं चेष्टां विना (unconsciously) भवति
(2) भाषा-शिक्षणं भाषा-पाठ्यपुस्तकानां पठनेन भवति
(3) भाषा-शिक्षणं मुद्रण-समृद्धपरिवेषे वर्धते
(4) विज्ञानस्य गणितस्य च शिक्षणे भाषा शिक्षणस्य आवश्यकता न विद्यते

**114.** रोदनम्, कूजनं तथा अस्पष्टभाषणम् एते सर्वे भाषाविकासस्य अवस्थाः सन्ति—

(1) प्रकरणात्मकम् (Referential)
(2) भाषिकम्
(3) प्राक्-भाषिकम्
(4) अभिव्यञ्जकम् (Expressive)

**115.** गार्विटः कक्षायां सहपाठिभिः सह हिन्दीभाषायां भाषते स्म। यदा तस्य अध्यापकः तम् आकारयत्, स तत्कालमेष आंग्लभाषायाम् उत्तरं दत्तवान्। एतत् कस्य उदाहरणम् अस्ति?

(1) कूट-परिवर्तनस्य (Code-switching)
(2) कूट-मिश्रणस्य (Code mixing)
(3) उपभाषायाः (Dialects)
(4) समाज-भाषाविज्ञानस्य (Socio-linguistics)

**116.** निम्नलिखितेषु कतमः वाइगोत्स्की (Vygotsky's) इत्यस्य समाज-सांस्कृतिकसिद्धान्तेन सम्बद्धः नास्ति?

(1) भाषा-अधिग्रहण-साधनम् (Language acquisition device)
(2) सामाजिक-अन्तःसम्पर्कः
(3) सोपान-निर्माणम् (Scaffolding)
(4) सामीप्यविकासस्य क्षेत्रम् (Zone of proximal development)

**117.** प्रत्येकं पाठ्यक्रमः शिक्षणपरिणामस्य विषये चर्चां करोति। अस्य आशयोऽस्ति—

(1) अध्यापकस्य अध्यापनविधौ परिवर्तनम्
(2) पाठ्यपुस्तकस्य विषयवस्तुनः विचारः
(3) छात्राणां व्यवहारे परिवर्तनम्
(4) सर्वेषां पाठानां समाप्तिः

**118.** भवतां दूरभाषे एकस्य दूरभाषस्य अङ्कानां अवलोकनं किं कथ्यते?

(1) विहंगावलोकनम् (Skimming)
(2) क्रमवीक्षणम् (Scanning)
(3) सर्वेक्षणम् (Survey)
(4) पुनर्वीक्षणम् (Review)

**119.** प्रकरणानुसारं नवीनशब्दानां परिभाषणं नवीनशब्दानाम् अर्थबोधस्य तुलनायाम्—

(1) समयस्य व्ययं करोति
(2) प्रायः छात्रान् भ्रमितान् करोति
(3) शब्दस्य सुष्ठु अर्थावबोधने सहायतां करोति
(4) रटनेन कण्ठस्थीकरणं प्रोत्साहयति

**120.** लेखनस्य प्रकारः यस्मिन् लेखकः आत्मानं पात्रस्य भूमिकायां स्थापयति (यदा-कदा न अपि) तथा कथां कथयति, ज्ञायते—

(1) वृत्तान्तात्मकम् (Narrative)
(2) विवरणात्मकम्
(3) प्रोत्साहकम्
(4) वर्णनात्मकम्

# PART—V / भागः —V

## LANGUAGE—II / भाषा—II
## Sanskrit / संस्कृतम्

अभ्यर्थिनः **पञ्चमभागस्य** (Part–V) प्रश्नानाम् (प्र० सं० **121–150**) उत्तराणि दद्युः, यदि तैः **संस्कृतं द्वितीयभाषा** (Language—II)-रूपेण चितम्।

**121.** उपन्यासपठनं निम्नलिखितस्य उदाहरणम् अस्ति—

(1) विहंगावलोकनस्य (Skimming)
(2) विस्तृतपठनस्य
(3) गहनपठनस्य
(4) क्रमवीक्षणस्य

**122.** निबन्धे उद्धरणप्रदानस्य मुख्य-उद्देश्यं किम् अस्ति?

(1) विशेषतथ्यानां विश्लेषणम्
(2) निबन्धस्य तानसामञ्जस्यं स्थापयितुम्
(3) जटिलविषयं व्याख्यातुम्
(4) अपरस्य दृष्टिकोणं प्रस्तौतुम्

**123.** कश्चिद् अध्यापकः अष्टमीकक्षायाः छात्रान् एकं लेखं ददाति यं सः तेषां स्तरात् उच्चतरं मन्यते। अनेकानि कार्याणि कर्तुं छात्रैः पाठ्येन सह कार्यं कर्तुम् इष्यते। एतत् किं कथ्यते?

(1) बोधगम्याः निवेशाः
(2) प्रस्तावित-शिक्षणपरिकल्पना
(3) अबोधगम्या निवेशाः
(4) अर्थावबोधाय पठनम्

**124.** व्याकरणस्य अध्यापनं मुख्यरूपेण निम्नलिखितं प्रोन्नेतुम् अस्ति—

(1) सांख्यिकीम्
(2) प्रवाहम्
(3) शुद्धताम्
(4) साक्षरताम्

**125.** व्याकरण-अध्यापनस्य मुख्यम् उद्देश्यं छात्रान् वार्तालापार्थं योग्यान् कर्तुम् अस्ति। निम्नलिखितेषु किम् एतद् उद्देश्यं न पूरयति?

(1) अशुद्धिशोधनं सदैव अध्यापकस्य प्रथमं दायित्वं नास्ति
(2) व्याकरणस्य प्रत्येकं विषयं छात्राः साधिकारं जानीयुः
(3) छात्राः स्पष्टाः निर्देशाः दातव्याः ये छात्रान् भूयस्तरैः सम्प्रेषणप्रकरणैः योजयेयुः
(4) छात्राः केवलं तान् पक्षान् जानीयुः ये सम्प्रेषण-कार्येण सम्बद्धाः सन्ति

**126.** पठने अर्थसंकेताः सहायकाः सन्ति—

(1) येन व्याकरणिक-रूपस्य अभिज्ञानं भवति
(2) येन शब्दस्य निष्कूटीकरणम् (decoding) भवति
(3) येन शब्दस्य शुद्धोच्चारणं भवति
(4) ये अर्थनिष्कर्षणप्रक्रियां वर्धापयन्ति

**127.** भाषायाः अध्ययन-अध्यापनस्य कः उपागमः एतद् विश्वसिति यत् भाषा निर्मितस्वभावः (habit) अस्ति?

(1) श्रवण-बहुभाषीयता
(2) सम्प्रेषणात्मक-भाषाशिक्षणम्
(3) सहकारि-भाषाशिक्षणम्
(4) प्राकृतिक-उपागमः

**133.** ''स समीपे वसति'' इत्यस्मिन्नर्थे गद्यांशे कः शब्दः प्रयुक्तः?

(1) प्रतिवेशी (2) पाययति

(3) विषाणी (4) कुम्भकारः

**134.** निम्नलिखितेषु प्रेरणार्थकं क्रियारूपं किम् अस्ति?

(1) पाययति (2) अचिन्तयत्

(3) दास्यामि (4) प्रत्यावर्तत

**135.** 'सेवानिरतः' इत्यस्मिन् पदे विग्रहपूर्वकं समासं कथम्?

(1) सेवायाः निर्गतः —पञ्चमी तत्पुरुषः (2) सेवायै निरतम्—चतुर्थी तत्पुरुषः

(3) सेवायां निरतः —षष्ठी-तत्पुरुषः (4) सेवायां निरतः य सः सेवानिरतः —बहुव्रीहिः

**निर्देशः** —निम्नलिखितं गद्यांशं पठित्वा सप्तप्रश्नानाम् (**136–142**) उत्तराणि यथोचितं विकल्पं चित्वा देयानि।

पार्वती शिवं पतिरूपेण प्राप्तुं तपस्याम् अकरोत्। सा पितृगृहं परित्यज्य कानने अवसत्। कानने हिंस्राः पशवः चरन्ति स्म। तथापि पार्वती निर्भया आसीत्। निर्भयं जनम् ईश्वरः स्वयमेव रक्षति।

पार्वत्याः कोमलतनुं दृष्ट्वा जननी आदिशत्—वत्से! क्व कठिनं तपः क्व च तव कोमलं शरीरम्? कथम् आतपात् शीतात् वा आत्मानं रक्षिष्यसि? तर्हि तपः मा चर। सुखेन स्वगृहे एव वस। अत्रैव व्रतादिकं कुरु। एतेनैव तव मनोरथः पूर्तिम् एष्यति।

परन्तु पार्वती अकथयत्— अम्ब! तपस्यामेव करिष्यामि। ईश्वरः मम रक्षां करिष्यति। तपस्यार्थं कोऽपि न गृहे वसेत्। एवमुक्त्वा सा वनमगच्छत् तपस्यां च समाचरत्।

कतिचित् मासाः गताः। एकदा कश्चिद् वटुः तपोवनं प्राविशत्। वटुं दृष्ट्वा पार्वती आसनात् उत्थाय तमुपगम्य सादरम् अकथयत्—वटो, स्वागतं ते। उपविशतु भवान्।

वटुः कुशलं पृष्ट्वा कौतूहलेन अपृच्छत्—हे तपस्विनि! किमर्थं कठिनं तपः समाचरसि? स्वकीयां तनुं च मलिनां करोषि? पार्वती न किञ्चिदवदत्। तत्सखी एव तस्याः तपसः प्रयोजनं वटवे न्यवेदयत्।

तत् श्रुत्वा वटुः अपृच्छत्—अयि पार्वति! किं सत्यमेव त्वं शिवं पतिमिच्छसि यो हि अशिवं चरति, श्मशाने वसति? यस्य त्रीणि नेत्राणि, यस्य वसनं गजचर्म, यस्य अङ्गरागः चिताभस्म, यस्य परिजनाश्च भूतगणाः, किं तमेव शिवं पतिं कर्तुम् इच्छसि?

शिवनिन्दां श्रुत्वा पार्वती क्रुद्धा जाता। सा अवदत् अपसर अरे वाचाल! त्वं महेश्वरस्य परमार्थस्वरूपमेव न जानासि। तत् नोचितं त्वया सह सम्भाषणम्।

एवमुक्त्वा यदा सा प्रस्थानाय उद्यता, तावदेव शिवः वटोः रूपं परित्यज्य तस्याः मार्गम् अवरुध्य अवदत्—''पार्वति! प्रीतोऽस्मि तव तपोभिः'' इति।

**136.** पार्वती किमर्थं तपस्याम् अकरोत्?

(1) पार्वती आत्मसुखाय तपस्याम् अकरोत्

(2) पार्वती पितुः आदेशात् तपस्याम् अकरोत्

(3) पार्वती मातुः आदेशात् तपस्याम् अकरोत्

(4) पार्वती शिवं पतिरूपेण प्राप्तुं तपस्याम् अकरोत्

**137.** ईश्वरः कं स्वयमेव रक्षति?

(1) निर्भयम् (2) शरणागतम्

(3) श्रद्धावन्तम् (4) स्तुतिपरकम्

**138.** ''तर्हि तपः मा चर'' एतानि वचनानि कस्य सन्ति?

(1) देवतानाम् (2) पार्वत्याः मातुः

(3) पार्वत्याः पितुः (4) वटोः

**139.** पार्वती आसनाद् उत्थाय कस्य स्वागतम् अकरोत्?

(1) इन्द्रस्य (2) पितुः

(3) देवतानाम् (4) वटोः

**140.** पार्वती किमर्थं क्रुद्धा अभवत्?

(1) वटुना मार्गावरोधात् (2) शिवनिन्दां श्रुत्वा

(3) मातुः परामर्शात् (4) वने पशूनां कोलाहलेन

**141.** 'एष्यति' इत्यस्य पदस्य निर्वचनं क्रियताम्—

(1) इ + लृट्लकारः प्रथमपुरुषः एकवचनम् (2) इष् + लृट्लकारः प्रथमपुरुषः एकवचनम्

(3) एष् + लट् + प्रथमपुरुषः एकवचनम् (4) एष्य् + लृट् + मध्यमपुरुषः द्विवचनम्

**142.** 'क्रुद्धा' इत्यस्मिन् पदे प्रकृति-प्रत्ययपूर्वकं निर्वचनं कुरुत—

(1) क्रुश् + ध + आट् (2) क्रुध् + ध + टाप्

(3) क्रुध् + क्त + टाप् (4) क्रुद्ध् + शप् + अ

**143.** लेखनस्य विभिन्न-अवस्थासु गच्छद्भिः लेखन-शिक्षणं किम् अस्ति?

(1) रचनात्मकलेखनम् (2) लेखनसन्दर्भे प्रक्रिया-उपागमः

(3) लेखनसन्दर्भे उत्पादन-उपागमः (4) विश्लेषणात्मकलेखनम्

**144.** छात्राणां सम्प्रेषणात्मककौशलस्य मूल्याङ्कनाय सर्वोपयुक्तप्रक्रिया काऽस्ति?

(1) दत्तपरिस्थितौ भाषणलेखनम् (2) चित्रात्मकपुस्तकात् कस्यापि दृश्यस्य वर्णनम्

(3) अभिनयकार्यक्रमे अभिनेतृरूपेण भागग्रहणम् (4) श्रवणपाठ्यस्य श्रवणं तथा मौखिकी प्रतिक्रिया

**145.** 'चौम्स्की' इत्यस्य मतानुसारं मानवाः भाषाविकासाय ______ धारयन्ति।

(1) दूरसम्प्रेषणतत्परता
(2) शिक्षणतन्त्रं
(3) शारीरिकप्रवृत्तिं
(4) वीक्षणतन्त्रं

**146.** विद्यालयीयायां शिक्षायां प्रारम्भतः एव बहुभाषीय-उपागमः निम्नलिखितानां दुष्परिणामान् निवारणे सहायकः अस्ति—

(1) दुर्बलसम्प्रेषणकौशलस्य
(2) विद्यालयात् निर्गमनस्य (Dropouts)
(3) शिक्षण-वैकल्यानां
(4) आत्मभाषायाः हानेः

**147.** नवसत्रस्य प्रारम्भात् पूर्वं भवान् छात्रान् मनोरञ्जक-शक्तिवर्धकक्रियायां नियोजयति। भवान् एतद् निम्नलिखितप्रयोजनात् करोति—

(1) छात्राणां ध्यानपरिवर्तनं कर्तुम्
(2) छात्रान् कक्षार्थं सज्जीकर्तुं प्रेरयितुम्
(3) अध्यापकरूपेण स्वकार्यभारं न्यूनं कर्तुम्
(4) पाठ-प्रारम्भात् पूर्वं कक्षायाम् अनुशासनं रक्षितुम्

**148.** शिक्षणसिद्धान्तस्य रूपे निर्माणात्मकः सिद्धान्तः विश्वसिति—

(1) शिक्षणं समाजे निर्मीयते
(2) शिक्षणं व्यक्तिगतविशेषता भवति
(3) सर्वे छात्रा भाषाः शिक्षितुं न समर्थाः
(4) शिक्षणं पूर्णतः मनोवैज्ञानिकस्थितिः अस्ति

**149.** यदा-कदा लोकाः एकस्मिन् एव वाक्ये विभिन्नभाषाणां तत्त्वानि मिश्रयन्ति। एतद् उदाहरणम् अस्ति—

(1) उपभाषायाः
(2) कूटपरिवर्तनस्य
(3) कूटमिश्रणस्य
(4) समाज-भाषाविज्ञानस्य (Socio-linguistics)

**150.** भाषायाः उच्चारणस्य विशेषनियमानां कारणात् छात्राः विश्वासस्य न्यूनतां अनुभवन्ति। एनां समस्यां समाधातुं एकः उपायः अस्ति—

(1) याः छात्राणां अशुद्धयः भवन्ति तासां शोधनम्
(2) छात्रान् कक्षायां पठितुं प्रोत्साहयितुम्
(3) परामर्शकेन सह विशेषभाषा-उपचारं कर्तुम्
(4) क्रीडा-सदृशीक्रियाणां प्रयोगः यः कक्षायां मौखिक-अन्तःसम्पर्कम् अपेक्षते

